# શિવતાંડવ સ્તોત્રમ્

જટાટવીગલજ્જલપ્રવાહપાવિતસ્થલે

ગલેઽવલમ્બ્ય લમ્બિતાં ભુજંગતુંગમાલિકામ્ ।

ડમડ્ડમડ્ડમડ્ડમન્નિનાદવડ્ડમર્વયં

ચકાર ચણ્ડતાણ્ડવં તનોતુ નઃ શિવઃ શિવમ્ ॥ ૧ ॥

જટાકટાહસમ્ભ્રમભ્રમન્નિલિમ્પનિર્ઝરીવિલો

લવીચિવલ્લરીવિરાજમાનમૂર્દ્ધનિ ।

ધગદ્ધગદ્ધગજ્જવલલ્લલાટપટ્ટપાવકે

કિશોરચન્દ્રશેખરે રતિઃ પ્રતિક્ષણં મમ ॥ ૨ ॥

ધરાધરેન્દ્રનન્દિનીવિલાસબન્ધુબન્ધુરસ્ફ

ુરદ્દિગન્તસન્તતિપ્રમોદમાનમાનસે ।

કૃપાકટાક્ષધોરણીનિરુદ્ધદુર્ધરાપદિ

ક્વચિદ્દિગમ્બરે મનો વિનોદમેતુ વસ્તુનિ ॥ ૩ ॥

જટાભુજંગપિંગલસ્ફુરત્ફણામણિપ્રભા-

કદમ્બકુઙ્કુમદ્રવપ્રલિપ્તદિગ્વધૂમુખે ।

મદાન્ધસિન્ધુરસ્ફુરત્ત્વગુત્તરીયમેદુરે

મનો વિનોદમદ્ભુતં બિભર્તુ ભૂતભર્તરિ ॥ ૪ ॥

સહસ્રલોચનપ્રભૃત્યશેષલેખશેખરપ્રસૂનધૂ

લિધોરણીવિધૂસરાઙ્ઘ્રિપીઠભૂઃ ।

ભુજંગરાજમાલયા નિબદ્ધજાટજૂટકઃ

શ્રિયૈ ચિરાય જાયતાં ચકોરબન્ધુશેખરઃ ॥ ૫ ॥

લલાટચત્વરજ્વલદ્ધનઞ્જયસ્ફુલિંગભાનિપ

ીતપઞ્ચસાયકં નમન્નિલિમ્પનાયકમ્ ।

સુધામયૂખલેખયા વિરાજમાનશેખરં

મહાકપાલિ સમ્પદે શિરો જટાલમસ્તુ નઃ ॥ ૬ ॥

કરાલભાલપટ્ટિકાધગદ્ધગદ્ધગજ્જ્વલદ્ધનઞ્જ

યાહુતીકૃતપ્રચણ્ડપઞ્ચસાયકે ।

ધરાધરેન્દ્રનન્દિનીકુચાગ્રચિત્રપત્રક-

પ્રકલ્પનૈકશિલ્પિનિ ત્રિલોચને રતિર્મમ ॥ ૭ ॥

નવીનમેઘમણ્ડલીનિરુદ્ધદુર્ધરસ્ફુરત્કુ

હૂનિશીથિનીતમઃપ્રબન્ધબદ્ધકન્ધરઃ ।

નિલિમ્પનિર્ઝરીધરસ્તનોતુ કૃત્તિસિન્ધુરઃ

કલાનિધાનબન્ધુરઃ શ્રિયં જગદ્ધુરન્ધરઃ ॥ ૮ ॥

પ્રફુલ્લનીલપંકજપ્રપઞ્ચકાલિમપ્રભાવલિ

મ્બકણ્ઠકન્દલીરુચિપ્રબદ્ધકન્ધરમ્ ।

સ્મરચ્છિદં પુરચ્છિદં ભવચ્છિદં મખચ્છિદં

ગજચ્છિદાન્ધકચ્છિદં તમન્તકચ્છિદં ભજે ॥ ૯ ॥

અખર્વસર્વમંગલાકલાકદમ્બમઞ્જરીરસપ્રવાહમાધ

ુરીવિજૃમ્ભણામધુવ્રતમ્ ।

સ્મરાન્તકં પુરાન્તકં ભવાન્તકં મખાન્તકં

ગજાન્તકાન્ધકાન્તકં તમન્તકાન્તકં ભજે ॥ ૧૦ ॥

જયત્વદભ્રવિભ્રમભ્રમદ્ભુજંગમશ્વસદ્વિનિ

ર્ગમત્ક્રમસ્ફુરત્કરાલભાલહવ્યવાટ્ ।

ધિમિદ્ધિમિદ્ધિમિદ્ધ્વનન્મૃદંગતુંગમંગલધ્વનિ

ક્રમપ્રવર્તિતપ્રચણ્ડતાણ્ડવઃ શિવઃ ॥ ૧૧ ॥

દૃષદ્વિચિત્રતલ્પયોર્ભુજંગમૌક્તિકસ્રજો-

ર્ગરિષ્ઠરત્નલોષ્ઠયોઃ સુહૃદ્વિપક્ષપક્ષયોઃ ।

તૃણારવિન્દચક્ષુષોઃ પ્રજામહીમહેન્દ્રયોઃ

સમપ્રવૃત્તિકઃ કદા સદાશિવં ભજામ્યહમ્ ॥ ૧૨ ॥

કદા નિલિમ્પનિર્ઝરીનિકુઞ્જકોટરે વસન્

વિમુક્તદુર્મતિઃ સદા શિરઃસ્થમઞ્જલિં વહન્ ।

વિલોલલોલલોચનો લલામભાલલગ્નકઃ
શિવેતિ મન્ત્રમુચ્ચરન્ કદા સુખી ભવામ્યહમ્ ।। ૧૩ ।।
ઈમં હિ નિત્યમેવમુક્તમુત્તમોત્તમં સ્તવં
પઠન્ સ્મરન્ બ્રુવન્નરો વિશુદ્ધિમેતિ સન્તતમ્ ।
હરે ગુરૌ સુભક્તિમાશુ યાતિ નાન્યથા ગતિં
વિમોહનં હિ દેહિનાં સુશંકરસ્ય ચિન્તનમ્ ।। ૧૪ ।।
પૂજાવસાનસમયે દશવક્ત્રગીતં
યઃ શમ્ભુપૂજનપરં પઠતિ પ્રદોષે ।
તસ્ય સ્થિરાં રથગજેન્દ્રતુરંગયુક્તાં
લક્ષ્મીં સદૈવ સુમુખીં પ્રદદાતિ શમ્ભુઃ ।। ૧૫ ।।
।। ઈતિ શ્રીરાવણકૃતં શિવતાણ્ડવસ્તોત્રં સમ્પૂર્ણમ્ ।।